सौरः भौमबुधजीवशुक्राः९ भौमबुधजीवशुक्राः, सौरः१०। एवमेकत्र १२०। अथ द्वौ द्वादशे, द्वावेव द्वितीये तद्यथा भौ॰बु॰,जी॰शु॰१ जी॰शु॰,भौ॰बु॰२। भौ॰बु॰,जी॰सौ॰३ जी॰सौ॰,भौ॰बु॰४। भौ॰बु॰, शु॰सौ॰५ शु॰सौ॰,भौ॰बु॰६। भौ॰जी॰, शु॰बु॰७ शु॰बु॰,भौ॰जी॰८। भौ॰जी॰, बु॰सौ॰९ बु॰भौ॰जी॰सौ॰१०। भौ॰जी॰, शु॰सौ॰११ शु॰सौ॰, भौ॰जी॰१२। भौ॰ शु॰, बु॰जी॰१३ बु॰जी॰, भौ॰शु॰१४। भौ॰शु॰, बु॰सौ॰१५ बु॰सौ॰भौ॰शु॰१६। भौ॰शु॰, जी॰सौ॰१७ जी॰सौ॰, भौ॰शु॰१८। बु॰जी॰, भौ॰सौ॰१९ भौ॰सौ॰बु॰जी॰२०। एकमेकत्र १५०। भौ॰सौ॰,बु॰शु॰१ बु॰शु॰,भौ॰सौ॰२। भौ॰सौ॰,जी॰शु॰३ जी॰शु॰,भौ॰सौ॰४। बु॰जी॰,शु॰सौ॰५ शु॰सौ॰,बु॰जी॰६। बु॰शु॰, जी॰सौ॰७ जी॰सौ॰,बु॰शु॰८। जी॰शु॰,बु॰सौ॰९ बु॰सौ॰जी॰शु॰१०। एवमेकत्र१६०। द्वौ द्वितीये त्रयो द्वादशे, द्वादशे द्वौ त्रयो द्वितीये तद्यथा भौ॰बु॰, जी॰शु॰सौ॰१ जी॰शु॰सौ॰, भौ॰बु॰२। भौ॰जी॰, बु॰शु॰सौ॰३ बु॰शु॰-सौ॰, भौ॰जी॰४। भौ॰शु॰, बु॰जी॰सौ॰५ बु॰जी॰सौ॰, भौ॰शु॰६। भौ॰सौ॰, बु॰जी॰शु॰७। बु॰जी॰शु॰, भौ॰सौ॰८। बु॰जी॰,भौ॰शु॰सौ॰९। भौ॰शु॰सौ॰,बु॰जी॰१०। एवमेकत्र १७०। बु॰शु॰, भौ॰जी॰सौ॰१ भौ॰जी॰सौ॰, बु॰ शु॰२। बु॰सौ॰, भौ॰जी॰शु॰३ भौ॰जी॰शु॰, बु॰सौ॰४। जी॰शु॰, भौ॰बु॰सौ॰५। भौ॰बु॰सौ॰, जी॰शु॰६। जी॰सौ॰, भौ॰बु॰शु॰७ भौ॰बु॰शु॰, जी॰सौ॰८। शु॰सौ॰,भौ॰बु॰जी॰९। भौ॰बु॰जी॰,शु॰सौ॰१०। एवमेकत्र१८०।

एवं दुरुधुरायोगभेदाः शतमशीत्यधिकं प्रदर्शितम्” भट्टो॰। “सम्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितो दुरुधुराप्रभवः सुभृत्यः। कोमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि वंशजाताः” बृहज्जा॰। अस्य पुंस्त्वमपि। “प्रचुरधनसमेतो भोगसौख्यान्वितः स्याद्गजहयरथमुख्यैर्वाहनैरन्वितश्च। बहुवितरणलज्जाप्रापिताखण्डकद्दुरुधुरजनितो ना भृत्यवर्गैः प्रपूर्णः” जातकपद्धतौ पुंस्त्वोक्तेः। “दधतेव योगमुभयग्रहान्तरस्थितिकारितं दुरुधुराख्यमिन्दुना” माघः।

**दुरुफ** पु॰ नी॰ता॰ उक्ते योगभेदे। “तम्बीरकुत्थौ दुरुफश्च योगाः स्युः षोडशैषां कथयामि लक्ष्म” इत्युद्दिश्य “लग्नात् षष्ठेऽष्टमेऽन्त्ये रिपुररिष्टहगो वक्रगो नीचगामी क्रूरैर्युक्तोऽस्तगो वा यदि सुथसिली क्रूरनीचारिभस्थैः। अनीचमाणक्तलुमस्तमागे स्थितः शुभोच्चादिपदैश्च शून्यः। क्रूरेत्थशालो न स वीर्ययुक्तः कार्यं विधातुं न विभुर्यतोऽसौ। चन्द्रः सूर्याद्द्वादशे हर्षिकाद्ये षण्डे नेष्टोऽन्त्ये तुलायां विशेषात्। राशीशेनादृष्टमूर्तिर्न सर्वैर्दृष्टो ज्ञेयः शून्यमार्गः पदोनः। क्षीणो भान्ते नो शुभो जन्मकाले पृच्छायां वा चन्द्र एवं विचिन्त्यः। शुक्ले भौमः कृष्णपक्षेऽर्कसूनुः सुदृढ्युदृष्टुं वीक्षते नो शुभोऽसौ। शुक्ले दिवा मृत्युहगोऽर्कसुतः शशाङ्कं कृष्णे कुजो निशि समर्त्यगतः प्रपश्येत्। दोषाल्पतां वितनुतेऽपरथा बहुत्वम् प्रश्नेऽथ वा जनुषि बुद्धिमतोहनीयम्”।

**दुरूह** त्रि॰ दुःखेन ऊह्यते दुर्+ऊह–कर्मणि खल्। दुर्वितर्क्ये। “जानीते जयदेव एव शरणः श्लाघ्ये दुरूहद्रुते” गीतगो॰।

**दुरेवा** त्रि॰ दुर्+इ–वा॰ व। दुःखेन गम्ये “पापासोऽभ्राया सहते दुरेवाः” ऋ॰५।२।९। “दुरेवाः दुःखगमनाः” भा॰।

**दुरोक** त्रि॰ दुष्ट ओकः समवायोऽत्र प्रा॰ब॰। दुःसेवे “दुरोकमग्निरायवे शुशोच” ऋ॰७।४।३ “दुरोकं दुःसेवम्” भा॰

**दुरोण** पु॰ गृहे निघण्टुः। “नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन्” ऋ॰३।१।१८। २यज्ञगृहे च। “काव्यो राजा नेषु कृत्वा दक्षस्य दुरोणे” यजु॰३३।७२ “दुरोणे यज्ञगृहे” वेददी॰ “असि दिवस्यायुर्दुरोणयुः” ऋ॰ ८।६०।१९ “दुरोणयुर्यजमानगृहस्य मिश्रयिता” भा॰ यु–मिश्रणे बा॰ कु। “हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्” कठोप॰।

**दुरोदर** पु॰ दुष्टम् आ समन्तादुदरमस्य। १द्यूतकारे २पणे मेदि॰। ३अक्षे ४द्यूते न॰ अमरः। “दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः” किरा॰। “न मृगयाऽभिरतिर्न दुरोदरम्” रघुः।

**दुर्ग** पुं न॰दुःखेन गम्यतेऽसौ दुर्+गम–बा॰ड। (गड़) (केल्ला) प्रसिद्धे राजाश्रयणीये १कोष्ठे। तत्स्वरूपभेदादिकं मत्स्यपुराणे २१६ अ॰ उक्तं यथा “एवंविधं यथालाभं राजा विषयमावसेत्। तत्र दुर्गं नृपः कुर्यात् षण्णामेकतमं बुधः। धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च। वार्क्षं चैवाम्बुदुर्गं च गिरिदुर्गं च पार्थिव!। सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते। दुर्गं च परिखोपेतं वप्राट्टालकसंयुतम्। शत-